International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(5): 154-158
© 2017 IJSR
www.anantaajournal.com
Received: 16-07-2017
Accepted: 20-08-2017

**डा. सुशान्तकुमारराजः**
सहाचार्यः, साहित्यविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
श्रीसदाशिवपरिसरः, पुरी, ओडिशा, भारत

**Correspondence**
**डा. सुशान्तकुमारराजः**
सहाचार्यः, साहित्यविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.)
श्रीसदाशिवपरिसरः, पुरी, ओडिशा, भारत

# नैषधीयचरितमहाकाव्ये श्रीहर्षस्य वर्ण्णनपटुत्वसमीक्षणम्

**डा. सुशान्तकुमारराजः**

**प्रस्तावना**

सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम्।
अलोकसामान्यमभिव्यनक्ति परिस्फुनन्तं प्रतिभाविशेषम्॥ [1]

एतद्वचनानुसारेण संस्कृतसाहित्ये सहृदयहृदयाह्लादिशब्दार्थमयत्वेन विनिर्मितानि नैकविधानि काव्यानि महाकाव्यानि च तत्तत्कवीनाम् अलौकिकं प्रतिभाविशेषं निरन्तरमभिव्यञ्जयन्ति । तेषां काव्यानामनुसन्धानबलेन काव्यकर्तुः रचनापाटवं समनुभूयते पाठकैः । मञ्जुलशब्दार्थयोः समावेशेन काव्यानि समुत्कृष्टानि भवन्तीति विदितचरमेव । शब्दार्थयोर्मञ्जुलत्वं रसध्वन्यादिसमन्वयेन गुणालङ्कारीतिवृत्त्यादिनिवेशेन च जायत इति आलङ्काराकाचार्याणामभिमतमस्ति । काव्यनिर्माणवेलायां रसगुणालङ्कारादियोगेन सह तदौचित्यपूर्णशब्दव्यवहार: कर्तव्य:, येन तत: चारुत्वसम्पन्नार्थबोधो भवेत्। संस्कृतसाहित्यजगति प्रतिभासम्पन्नकवीषु कालिदास-भारवि-माघ-दण्डि-श्रीहर्षादयो महाकवयः प्रमुखस्थानं भजन्ते । एषु कविवरेषु वर्णनापाटवदृष्ट्या न्यायवेदान्तादिशास्त्रनिपुणकवेः श्रीहर्षस्य वैशिष्ट्यं प्रणीधानयोग्यमस्ति।
ख्रीष्टीयद्वादशशतके लब्धजनुषा महाराजस्य जयचन्द्रस्य पृष्ठपोषकताम् आप्तेन महाकविना श्रीमता श्रीहर्षेण द्वाविंशतिसर्गात्मकं नैषधीयचरितमिति एकं महाकाव्यं व्यरचि। महाकविनाऽनेन महाभारतस्य वनपर्वणि विद्यमानं नलदमयन्ती-उपाख्यानमाधारीकृत्य इदं काव्यरत्नं विनिर्मितम् । महाकाव्येऽस्मिन् विद्यमाना वर्णनाशैली सकलसहृदयहृदयाह्लादकारिणी सम्पद्यते । अत्र वैदिकशास्त्रादारभ्य सर्वाण्यपि शास्त्रीयतत्त्वानि स्वशैल्या प्रकाशितानि सन्ति। मम्मटभट्टस्य काव्यकारणगतसिद्धान्तानुरोधेन [2] काव्येऽस्मिन् कविना लोकशास्त्रकाव्याद्यवेक्षणं परमोपादेयतया समीहितम्। अतः नैषधीयचरितमहाकाव्यस्य परिशीलनेन कवेः रचनापाटवं सर्वत्र एव समुपलभ्यते । प्रतिज्ञानुरोधेनास्मिन्निबन्धे नैषधीयचरिते महाकाव्ये विद्यमानं महाकवेः श्रीहर्षस्य वर्ण्णनपाटवं सारगर्भतया समीक्षणीयम्।
विदर्भराजस्य भीमस्य तनया भवति अपूर्वसुन्दरी नैकगुणवती परमविदुषी दमयन्ती। निषधदेशस्याधिपति: भवति वीरसेनतनूज: सर्वगुणसंपन्नो महाराजो नल: । नल-दमयन्त्यो: उद्दामप्रेमवर्ण्णनपुर:सरम् उभयो: विवाह:, ततस्तयोर्मिलनमत्र नैषधीयचरतमहाकाव्ये संपूर्णकाव्यिकच्छटामाध्यमेन चित्रितमस्ति। महाकवि: विभिन्नान् रसालङ्कारादीन् योजयित्वा केन प्रकारेण वर्ण्णनवैविध्यं प्रकटयति, तत्सर्वमालोच्यते। नैषधीयचरितमहाकाव्यस्य प्रथमे सर्गे नलराजस्य प्रतापवर्ण्णनप्रसङ्गे अनेके वैचित्र्यपूर्णाः श्लोका रचिता: सन्ति। तेषु एकोऽत्रालोच्यते। यथा –

यदस्य यात्रासु वलोद्धतं रज: स्फुरत्प्रतापानलधूममञ्जिम।
तदेव गत्वा पतितं सुधाम्बुधौ दधाति पङ्कीभवदङ्कतां विधौ॥ [3] इति।

आकाशे पूर्णचन्द्रो दृश्यते। चन्द्रस्य मध्यभागे कलङ्को राजते। इदमेव चन्द्रस्य प्राकृतिकं चित्रम्। महाकवि: एतत्प्राकृतिकं चित्रमादाय अतिशयोक्त्यलङ्कारमाश्रित्य तस्य कलङ्कं पङ्कत्वेन चित्रयति । कवेरयमभिप्रायो: यत् नलस्य सैनिका: हस्तिघोटकादिभि: सह यदा युद्धार्थं गता: तदा तेषां घटकानां पदाघातेन भूपृष्ठात् उत्थितं रज: उड्डीय सुधाम्बुधौ पतितम्। तेन हेतुना सुधाम्बुधि: पङ्किलोऽभवत् । पङ्किलात्सुधासागरात् समुत्पन्नस्य चन्द्रस्य शरीरे लग्न: पङ्क: अधुना अपि कलङ्करूपेण अस्माभि: दृश्यते इति । चन्द्रवर्ण्णनप्रसङ्गे एतादृशं चित्रं सहृदयान् आमोदयति । अत्र वर्ण्णनवैचित्र्यम् अतिशयोक्त्यलङ्कारप्रयोगद्वारा चमत्कारातिशय्यं सृजति।
नैषधीयचरिते स्थलान्तरे महाकविना श्रीहर्षेण एतच्चन्द्रवर्ण्णनमन्यथा कृतमस्ति। द्वितीयसर्गे दमयन्तीमुखवर्ण्णने कवि: लिखति-

हतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा।
कृतमध्यविलं विलोक्यते धृतगम्भीरखनीखनीलिम ॥[4] इति।

वेधा: (ब्रह्मणा) यदा दमयन्त्या: मुखनिर्माणं कृतवान्, तदा स: चन्द्रमण्डलात्सारवस्तु आनीतवान् । सारवस्तु- आनयने चन्द्रमण्डलेगर्तं संजातम् । तेनगर्तेन चन्द्रस्य पार्श्वान्तरे विद्यमानस्य आकाशस्य नीलिमा दृश्यते । अतिशयोक्त्यपह्नुत्यलङ्कारप्रयोगेण कवि: वर्णयितुमभिलषति यत् चन्द्रमण्डले य: कलङ्क: दृश्यते स: कलङ्को नास्ति, अपि तु दमयन्तीमुखनिर्माणाय ब्रह्मणा चन्द्रात्खनित्वा ततः सर्वविधः सारपदार्थ: आनीत:, तेन संजातेन गर्त्तेन अपरपार्श्वे विद्यमानस्य आकाशस्य नीलिमावलोक्यते। पुन: दमयन्तीमुखं वर्णयितुं सकलङ्कं चन्द्रंकवि: प्रकारान्तरेण उपस्थापयति। कविरुत्प्रेक्षतेयत् चन्द्रेविद्यमान: कलङ्क: न कलङ्क:, अपि च तस्य चतु:पार्श्वे विद्यमाना पाण्डुरकान्ति: नैव पाण्डुरकान्ति: इति। चन्द्रापेक्षया दमयन्त्या: मुखमतीव सुन्दरमिति कृत्वा विधि: चन्द्रमाध्यमेन तन्मुखस्य अरात्रिकं संपादयति। कवे: भाषया-

धृतलाञ्छनगोमयाऽञ्चनं विधुमालेपनपाण्डुरं विधि:।
भ्रमयत्युचितं विदर्भजाऽऽनननीराजनवर्धमानकम्॥[5] इति।

आरत्रिकसमये यथा कश्चित् मृण्मयपात्रे गोमयं चन्दनञ्च आलेपनम् संस्थाप्य कस्यचिदारत्रिकं करोति तथाविधि: गोमयस्वरूपं कलङ्कं चन्दनस्वरूपंपाण्डुरवर्ण्ययुक्तं चन्द्रं दमयन्तीवदनारात्रिकार्थं भ्रमयति । प्रथमे सर्गेऽपि चन्द्रापेक्षया नलस्य मुखस्य सौन्दर्याधिक्यं प्रतिपादयितुं कवि: वर्णयति यत्, शारद: पार्विकशर्वरीश्वर: नलस्य मुखदास्य-मधिकर्तुमसमर्थ: अभवदिति । यथा च कवे: भाषया –

अधारि पद्मेषु तदङ्घ्रिणा घृणा क्व तत्शयच्छायलवोऽपि पल्लवे।
तदास्यदास्येऽपि गतोऽधिकारितां नशारद: पार्विकशर्वरीश्वर: ॥[6] इति।

नलस्य दानशीलतां प्रदर्शयितुं महाकवि: पुनरतिशयोक्त्यिलङ्कारमाश्रत्यि स्ववर्ण्णनवैभवमुपस्थापयति। यथा-

अयं दरिद्रो भवितेति वैधसीं लिपिं ललाटेऽर्थिजनस्य जाग्रतीम्।
मृषा न चोऽल्पितकल्पपादप: प्रणीय दारिद्र्यदरिद्रतां नृप: ॥[7] इति।

कस्यचिज्जनस्य कर्मानुसारेण स: दरिद्र: धनी वा भवेदिति विधाता तस्य जन्मसमये तल्ललाटेलिखति । एवमपि केचनजना: नलस्य राज्ये आसन्, ये तावत्दरिद्रा भविष्यन्तीति विधात्रा ललाटलेखया सूचना प्रदत्ता । नलस्तु एतादृशेभ्य: प्रचुरं धनदानं कृतवान् । अर्थिजनस्य कृते एतावतापरिमाणेन स: धनदानं कृतवान्, येन कल्पपादप: तदपेक्षया अल्पितोऽभवत्। अत्र तात्पर्यमिदं यत् कल्पपादपापेक्षयाऽपि राजा नल: अधिकं धनम् अर्थिजनेभ्य: अददात्। एतेन दरिद्रजना: धनिन: अजायन्त। एतेषां निकटे धनलाभेन दारिद्र्यं न्यूनमभवत् । कविरेतत्स्वभाषया प्रकाशयितुं लिखति, नृप: दरिद्रतां प्रणीय विधातुः अयं दरिद्रो भविता इति ललाटलेखं भ्रमं चकार । एतेन जनस्य निकटे विद्यमानं दारिद्र्यं दरिद्रमभवदिति दारिद्र्यदरिद्रतया वैधसीलिपि: अन्यथा नजाता। इत्थं नलस्य दानशीलता प्रतिपादिता। प्रकारान्तरेण तादृशंवर्ण्णनं श्रीहर्षेण नैषधीयचरितस्य द्वादशसर्गेऽपि विहितम् । दमयन्त्या: स्वयम्बरसभायां सरस्वतीमुखेन कवि: उत्कलराजस्य दानशीलतां स्फुरयितुं लिखति, यत् -

अनेन सर्वार्थिकृतार्थताकृताऽऽहृतार्थिनौ कामगवीसुरद्रुमौ।
मिथ: पय:सेचनपल्लवाशने प्रदाय दानव्यसनं समाप्नुत: ॥[8] इति।

अतिशयोक्त्यलङ्कारमाध्यमेनमात्र कवि: उत्कलराजवर्ण्णनसमये सरस्वतीमुखेन सूचयति यत्, उत्कलराज: महादानी आसीत्। स: इत्थं प्रजाभ्य: धनादिदानं करोति, येन दानकर्मणि लब्धप्रतिष्ठौ कामधेनू-कल्पवृक्षौ च अर्थिजनान्नाप्नवन्तौ। केवलं तौ द्वौ मिथ: दानव्यासनमाप्नुत: । अर्थात् कामधेनू: कल्पद्रुममूले स्वपय:सेचनद्वारा स्वस्य दानशीलतां प्रदर्शयति । दद्विनिमयेन कल्पद्रुम: स्वस्य कोमलपत्राणि खाद्यरूपेण कामधेनवे समर्प्य स्वदानशीलतां प्रदर्शयति । नैषधीयचरितस्य त्रयोदशसर्गे पञ्चनलीवर्ण्णनप्रसङ्गेऽपि कवे: वर्ण्णनपाटवम् अतीव चित्ताकर्षकं भवति, तद्यथा-

देव: पतिर्विदुषि! नैषधराजगत्या निर्ण्णीयते न किमु न व्रियते भवत्या ?
नायं नल: खलु तवातिमहानलाभो यद्येनमुज्झसि वर: कतर: परस्ते ?[9] इति।

वसन्ततिलकच्छन्दसा विरचिते श्लोकेऽस्मिन् कवि: श्लेषालङ्कारमाध्यमेन काव्यसौन्दर्यं वर्धयति । अत्र पद्ये विद्यमानमतिमहानलाभ: नैषधराजगत्या: चेति पदमादाय कवि: श्लेषेण इन्द्रपक्षे कथयति, यदेष पुरोवर्ती दृश्यमान: राजा धराजगत्या: (भूपृष्टस्य) पति: न, प्रत्युत स्वर्गस्य पतिरिन्द्र: अस्ति। अयं नल: खलु, किन्तु नलाभ: (नलवदाभातीति) अपि चासौ अतिमहा:, अत्यधिकं मह: तेज: यस्य स: इत्यर्थ: । यदि एनमुज्झसि तर्हि एतदपेक्षया क: तव कृतेपर: श्रेष्ठ: (वर:) स्यात् ? अत: असौ त्वया वरणीय: । वह्निपक्षे-धरतीतिधर: वाहनमित्यर्थ:। सचासौ अजश्चेति (मेष:)धराज: अर्थात्पुरोवर्ती असौ मेषवाहन: आग्नदेव: । धराजद्वारा या गतिस्तया उपलक्षित: एष पति: भवति। अतिमहा: (अतितेजस्वी) असौ नलवदाभाति। अथवा अतिमहत: अनलस्य भा: (दीप्ति:) तदवान् स: महानलाभ: इति। एवम्भूत:आग्नदेव: किमुन व्रियते? यमपक्षे-धरां पृथिवीं (भूमिम्) किम्बाधरान्पर्वतान्खुरै: शृङ्गाभ्यां वाअजति (क्षपिति) इतिधराज: महिष:, तेन यागतिस्तयोपलक्षित: पति: पालयितादेव:, यमराज इत्यर्थ: एतादृश: यमराज: पुरोविभाति,य: महानलाभ:( महान्अपि च नलवदाभाति)अस्ति। स: किमु भवत्या न व्रियते ? यदि एनमुज्झसि तर्हि कतर: तव कृते पर: (श्रेष्ठ:) स्यात् ? वरुणपक्षे- असौपुरोविद्यमान: देव: धराजानाम् (धरायां जातानां) अर्थात्पृथिव्यां जातानां सर्वेषां तरुलतागुल्ममनुष्यादीनां कृते जलदानं कृत्वागति: (जीवनधायक:) भवति। धराजानां गत्या गतिहेतुना अयं देव: इति प्रसिद्ध:। असौ अपि अतिमहस्य (पूज्यस्य) अनलस्यापि आभा: (कान्ति-अभाव:) यस्मात् तादृश: अस्ति । जलदेवतात्वात् आग्नतेजोनिर्वापयितृत्वमस्मिन्नस्ति। अत: असौ किमु भवत्या न व्रियते ? नलपक्षे-असौ पुरोवर्ती राजा नैषधो राजगत्या किमुन निर्ण्णीयते ? नैषधदेशस्य राजा इति कृत्वा या गति: ज्ञानं तया गत्या किमुअसौन व्रियते ? वरणीय इत्यर्थ: । पक्षान्तरे धराजगत्या एष ना (नर) पतिर्न किमु ? पतिरेवास्ति। नायं नल: अर्थात् अयं नल: अर्थात् अयं ना (नर:) नल एव। यदि एनमुज्झसि तर्हि तव महान् अलाभ: (हानि:) स्यात् । एतदतिरिच्य अपर: क: वर: तवपर: श्रेष्ठ: स्यात् ? न कोऽपीत्यर्थ: । आस्मिन्पद्ये नैषधराजः गत्या महानलाभ: इति पदद्वयमाश्रित्य महाकवि: श्लेषालङ्कारमाध्यमेन पञ्चार्थान् प्रतिपाद्य वर्ण्णनवैविध्यं प्रदर्शयति । एकस्य मुखस्य वर्ण्णने भिन्नभिन्नकल्पनाधारेण कवि: यत् वर्ण्णयति, तत्र वर्ण्णने चमत्कारिता दृश्यते । प्रथमे सर्गे नलस्य केशवर्ण्णने द्वितीये सर्गे च दमयन्त्या: केशवर्ण्णने विविधता दृश्यते। प्रथमसर्गे नलस्य केशवर्ण्णनं यथा –

स्वबालभारस्य तदुत्तमाङ्गजै: समं चमर्येव तुलाऽभिलाषिण:।
अनागसे शंसति बालचापलं पुन: पुन: पुच्छविलोलनच्छलात्॥[10] इति।

नलस्य केशपाश: अत्युत्तम: आसीत्। चमरी स्वपुच्छं नलस्य केशै: सह तुलयति, परन्तु यदा नल केशसौन्दर्यापेक्षया स्वपुच्छस्य सौन्दर्यं न्यूनतरमिति अनुभूतं तदा स्वबालभारस्य अपराधाभावाय पुन: पुन: चालयति । यथा कश्चिद् बाल चपल: भवतीति तस्य चापल्यं नापराधाय इति तन्माताशंसति, तथैव चमरी अपि स्वलाङ्गूलचापलव्याजेन निजबालभारस्यापराधोनास्तीति कथयति । द्वितीयसर्गे दमयन्त्या: केशवर्ण्णने महाकवि: श्रीहर्षो लिखति, यत्-

चिकुरप्रकरा जयन्ति ते विदुषीमूर्धनि सा विभर्ति यान्।
पशुनाऽप्यपुरस्कृतेन ततुलनामिच्छतु चामरेण क: ॥[11] इति।

दमयन्त्या: सौन्दर्यवर्ण्णनप्रसङ्गे हंस: नलस्य पुरस्तात्भणति, हे राजन्नल ! दमयन्त्या: शिर:स्थिता: केशसमूहा: सर्वोत्कर्षेण राजन्ते। चामराणाम् उत्कृष्टत्वे सति दमयन्त्या:

चिकुरा: कथं सर्वोत्कर्षेण राजन्ते इति चेत् उत्तरे प्रकाशयति कवि: यत्, पशुना चमरमृगेण स्वपश्चाद्भागे धृतानां बालानां सौन्दर्येण सह को वा दमयन्त्या: चिकुराणां तुलनां कुर्यात्? अर्थात् दमयन्त्या: उत्तमाङ्गे स्थितै: चिकुरै: सह चमराणां पृष्ठभागे गतानां पुच्छबालानां तुलनां कोऽपि कर्त्तुं नेच्छति । एतेन केशवर्ण्णनप्रसङ्गे कवे: वर्ण्णनवैविध्यं सम्यग् प्रतिभाति ।

तत्रैव द्वितीयसर्गे कुण्डिननगरीवर्ण्णनप्रसङ्गे श्रीहर्ष: अतिशयोक्त्यलङ्कारमुपयुज्य कल्पनाविलासितां प्रदर्शयति अस्मिन् प्रसङ्गे एकस्मिन्श्लोके स: लिखति-

व्रजते दिवि यद् गृहाऽऽवलीचलचेलाऽञ्चलदण्डताडना:।
व्यतरन्नरुणाय विश्रमं सृजते हेलिहयाऽऽलिकालनाम् ॥[12] इति ।

कुण्डिननगर्याम् उच्चतमा अट्टालिका: आसन् । अट्टालिकानामग्रभागे पताका: अशोभन्त । पवनवशात् ता: पताका: उड्डीयन्ते । कवि: अत्र प्रकाशयति यत्, यदा कुण्डिननगरोपरि सूर्यस्य रथ: प्रतिष्ठते, तदा सूर्यस्य सारथि: अरुण: रथकाहनघोटकानां चोदनां नकृत्वा विश्रामं करोति । कुत इति चेत् ? कुण्डिननगरोपरि पवनेन उड्डीयमाना: पताका: घोटकानांशरीरे लग्ना: सत्य: तेषां कशाघातताडनं विदधति। सारथेररुणस्य ताडनं विना अश्वा: यथापूर्वं रथमाकर्षन्ति । पताकाताडनं कशाघातरूपेण चित्रयत: कवे: वर्ण्णनवैचित्र्यमेतेन स्पष्टतया ज्ञायते । चतुर्थसर्गे श्रीहर्ष: विरहिण्या: दमयन्त्या: चन्द्रोपालम्भवर्ण्णने विरहिणीजनोचितं कथनं समुपस्थापयति । विरहिणी दमयन्ती चन्द्रसकाशात् यदा पीडामनुभूतवती तदा सखीमुद्दिश्य सा कथयति, हे प्रियसखि !

कुरु करे गुरुमेकमयोघनं बहिरितो मुकुरं च कुरुष्व मे ।
विशति तत्र यदैव विधुस्तदा सखि ! सुखादहितं जिहितं द्रुतम् ॥[13] इति ।

अयि सखि, त्वं स्वकरे गुरुं लोहमुद्गरमेकं गृहाण, गृहाद्बहिर्दर्पणं च संस्थापय । रात्रौ यदा चन्द्र: प्रतिबिम्बरूपेण दर्पणे प्रतिफलितो भवेत्तदा लोहमुद्गरेण दर्पणोपरि प्रहर, तेन अहितश्चन्द्र: म्रियेत, अहं तन्मरणात्तत् कृतां पीडां नानुभविष्यामि । अत्र विरहपीडिताया: उन्मादग्रस्ताया: दमयन्त्या: विफलोक्तिं कवि: चिन्तयन् स्ववर्ण्णननैपुण्यं प्रदर्शयति । चन्द्रकिरणेनातिमात्रं संतप्ताया: विरहिण्या: दमयन्त्या: सखीमुद्दिश्य स्वमनोभावप्रकाशनावसरे कवि: पुन: प्रकाशयति यत्-

श्रवणपूरतमालदलाङ्कुरं शशिकुरङ्गमुखे सखिनि क्षिप। ।
किमपि तुन्दिलित: स्थगयत्यमुं सपदि तेन तदुच्छ्वसिमि क्षणम्॥[14] इति ।

अत्र सखीं प्रति दमयन्ती वदति, हे सखि ! मम श्रवणालङ्काररूपेण विद्यमानं तमालदलाङ्कुरं (नूतनतमालपत्रम्) चन्द्रोदरे विद्यमानस्य कुरङ्गस्य मुखे भोजनरूपेण समर्पय । सोऽपि कुरङ्ग: तद्भक्षणे किञ्चित्तुन्दिलितो भूत्वा चन्द्रमाम् आच्छादयेत् । एतेन चन्द्रस्य शरीरंकिञ्चिदधिकमावृतं स्यात् । चन्द्रकिरणा: बहुलतया नागच्छेयु: । अत: अहं कियत् कालं यावत् चन्द्रोत्पादितां विरहव्यथां नानुभविष्यामि । अत्र विरहिण्या: दमयन्त्या: अवस्थावर्ण्णनेइतस्तत: असमञ्जसालापवर्ण्णनेकवे: रचनाचारुत्वं दृश्यते । नलविरहेण संतप्ताया: दमयन्त्या: स्मरोपालम्भवर्ण्णनप्रसङ्गेऽपि कवे: रचनावैविध्यं दृश्यते । आलोचनाप्रसङ्गे पद्यमेकमुपस्थाप्यते, तद् यथा-

उपहरन्ति न कस्य सुपर्वण: सुमनस: कति पञ्च सुरद्रुमा: ।
तव तु हीनतया पृथगेकिकां धिगियताऽपि न तेऽङ्गविदारणम् ॥[15] इति ।

कन्दर्प: पञ्चशर: इति ख्यातम् । पञ्चभि: पुष्पै: तस्य शरा: निर्मिता: सन्तीति विदितचरमेव । विरहिणी दमयन्ती कन्दर्पमाक्षिप्य वदति, हे अनङ्ग! पञ्चसुरद्रुमा: मन्दारादय: देवानां कृते कति कति पुष्पाणि नार्पयन्ति? अर्थात् यथेच्छं पुष्पाणि देवेभ्य: प्रयच्छन्ति । त्वमपि एक: देव:, परन्तुत्वमतीव हीन: (निकृष्ट:), अत: तुभ्यं ते एकैकश: एकमेकं पुष्पं ददति । त्वं तेभ्य: तानि पञ्चपुष्पाणि आनीय केवलं पञ्चशरान्निर्मासि । अत: त्वां धिगस्तु । एतादृशं कन्दर्पनिन्दां पुन: प्रकारान्तरेण कवि: विधाय वर्ण्णनवैभवं सूचयति । तद् यथा –

षड्तव: कृपया स्वकमेककं कुसुममामनन्दितनन्दना: ।
ददति यद् भवते कुरुते भवान्धनुरिवैकमिषूनिव पञ्च तै:॥ [16]

अत्र पुन: कन्दर्पस्य निन्दां कृत्वा दमयन्ती वदति, हे कन्दर्प! ग्रीष्मादय: षड्तव: त्वयि कृपापरायणा: सन्त: न तु प्रीत्या स्व स्वसमये विकसितेभ्य: कुसुमेभ्य: एकमेकं कुसुमं तुभ्यमयच्छन् । ऋतव: अपि तवहीनत्वं विज्ञाय नाधिकं पुष्पं तुभ्यं दत्तवन्त: । वराकस्त्वमपि तेभ्य: एके नपुष्पेण धनुर्निमाय अवशिष्टानि पञ्चपुष्पाणि शररूपेण व्यवहरसि । अत: त्वांधिगस्तु । अत्र उपर्यालोचितयो: पद्ययो: यद्यपि कन्दर्पस्य पञ्चपुष्पशरत्वविषये आलोचितं तथापि उभयोर्मध्ये कविप्रतिभावलात् वर्ण्णनवैविध्यमनुभूयते । नैषधीयचरितस्य नवमे सर्गे स्थलमेकमालोच्यते, यत्र उक्तिवैचित्र्येण वर्ण्णनवैविध्यं चित्रितम् । यथा-

मयापि देयं प्रतिवाचिकं न ते स्वनाम मत्कर्ण्णसुधामकुर्वते ।
परेण पुंसा हि ममापि संकथा कुलावलाचारसहासनासहा ॥ [17]

दूतरूपेण नल: दमयन्तीनिकटं गत: । तत्र प्रतिज्ञानुसारेण तेन स्वपरिचय: दमयन्तीनिकटे नदत्त: । दमयन्ती परन्तु तस्य परिचयं ज्ञातुमुत्कण्ठिता । अस्यां परिस्थितौ दूतरूपेण स्थितस्य नलस्य परिचयं प्राप्तुमुत्सुका दमयन्ती साक्षात् एतन्नोक्त्वा वदति, हे अङ्ग! मया तव नामकुलादिविषये पृष्टं, परन्तु एतत्त्वं नोक्त्वा अन्यत् अनावश्यकं वदसि । अत: अपरिचिताय तुभ्यं मयापि प्रत्युत्तरं नदीयते । इयमेव कुलावलानांपरम्परा यत् ता: परेण पुंसा आलापं न कुर्यु: । कुलावलानां या आचरणपरम्पराऽस्ति, सा अपरिचितेन परेण पुरुषेण सह आलापं रुणद्धि । अत: आदौ त्वं परिचयं देहि। अत्र दमयन्त्या: दूतेन सह उक्तिवैचित्र्यं चमत्कारमातनोति । नैषधीयचरितस्य प्रथमेसर्गे उद्यानवर्ण्णने प्रसङ्गे केतकवर्ण्णनं करोति कवि: । सामान्यतया तीक्ष्णाग्रं क्रकचधारायुक्तं केतकं कवि: यथा वर्ण्णयति तेन तस्य प्रौढपाण्डित्यस्य पराकाष्ठा दृश्यते । कवि: लिखति—

त्वदग्रसूचीसचिव: स कामिनोर्मनोभव: सीव्यति दुर्यश:पटौ ।
स्फुटं स पत्रै: करपत्रमूर्तिभि: वियोगिहृद्दारुणि दारुणायते॥[18] इति ।

केतक्या: अग्रभाग: अतितीक्ष्णत्वात्सूचीसमानो वर्तते । कवि: कल्पयति यत् केतक्या: तादृशस्याग्रभागस्य साहाय्यं नीत्वा काम: अग्रभाग: कामिनो: अपयशपटौ सीव्यति । अर्थात्कामोद्दीपकत्वात्तादृशं केतकं विलोक्य कामीकामिनी च तादृशं कर्म कुर्वन्ति येन तयोरपयश: सर्वत्र खेलति । नकेवलमेतत् केतकपत्रस्य पार्श्वद्वयमपि क्रकचाकारत्वात् विरहिजनहृदयरूपकदारुणि (काष्ठे) दारुणायते । अर्थात् क्रकचं यथा काष्ठं कृन्तति तथा तत् वियोगिहृदयं कृन्तति । तत्रापि पुष्करिणीवर्ण्णने कवे: अलौकिकचिन्तनशक्ते: पारङ्गमता विलोक्यते । उपवने वृक्षालवालेषु जलसेचनाय एक: लघुस्तडाग: निर्मित: आसीत् । कवि: अमुं लघुतडागं समुद्रेण सह उपमितवान् । समुद्रे यद्यद् वस्तुवर्तते तत्सर्वमस्मिन् तडागेऽपि अस्तीति कवे: भावना। समुद्रे वडवानलो वर्तते । तडागच्छद्मनाविराजिते अस्मिन् वडवानलोऽपि अन्त: अस्तीति प्रतिपादयितुं कवि: लिखति-

चलीकृता यत्र तरङ्गरिङ्गणैरवालशैवाललतापरम्परा: ।
ध्रुवं दधुर्वाडवहव्यवाडवस्थितिप्ररोहत्तमभूमधूमताम्॥[19] इति ।

यत्र यत्र धूमस्तत्र तत्र वह्निरित्यनुमानं साहचर्यनियमाद् भवति । कविरत्र प्रकाशयितुमिच्छति यत् आस्मन् तडागसमुद्रे पवनवशात्प्रचुरशैवालपरंपरा चञ्चलीभूता भवति । इयं शैवालपरंपरा अन्तर्विद्यमानस्य वाडवानलस्य धूमावलि: । यत: उपरि धूम: शोभते, अत: अन्त: अवश्यमग्निरस्ति । सचाग्निर्वाडवाग्निरिति सिद्धम् । सामान्यशैवालमव- लोक्य वाडवाग्ने: कल्पना कवे: रचनापटुतां सूचयति ।

तडागनिकटे हंसधारणानन्तरं स: हंस: नलम् उद्दिश्य निन्दति । एतत् वर्ण्णयितुं कविर्लिखति, यथा-

धिगस्तु तृष्णातरलं भवन्मन: समीक्ष्य पक्षान्मम हेमजन्मन: ।
तवाऽर्ण्णवस्येव तुषारशीकरैर्भवेदमीभि: कमलोदय: कियान्॥[20] इति ।

हंस: क्रन्दन्नलं वदति, हे राजन् ! सुवर्ण्णमयान् मम पक्षानवलोक्य लोभासक्तं तव मन: धिगस्तु । यद्यपि मम पक्षा: स्वर्ण्णमया: तथापि परिमाणेन एते अत्यल्पा: । यथा तुषारबिान्दुभि: समुद्रस्य कमल(जल)वृद्धि: न स्यात् तथा तव कोषागारस्य बहुभि: स्वर्ण्णै: पूर्ण्णतां गतस्य एतैरल्पै: सुवर्ण्णै: वृद्धि: न स्यात् । अत: मम मारणम् सर्वथा अकारणम् । मम सुवर्ण्ण पक्षान् दृष्ट्वा तृष्णातरलितं तव मन: धिक् । एतादृशं नलं प्रति हंसेन कृतं निन्दनं कवे: वर्ण्णनाचातुर्रीं सूचयति ।
विधातारमुद्दिश्य हंसेन य: शोकावेग: प्रकटित:, स: महाकवेः श्रीहर्षस्य करुणरसप्रकाशपाटवं दर्शयति । तत्रप्रथमसर्गेहंसमुखेनकवि: प्रकाशयति यत् –

मदेकपुत्रा जननी जराऽऽतुरा, नवप्रसूतिर्वरटा तपस्विनी ।
गतिस्तयोरेष जनस्तमर्दयन् अहो विधे त्वां करुणा रुणद्धि नो ॥[21] इति ।

हंस: विलपन्वदति, हे विधे! अहं मम जनन्या: एक: एव पुत्र: आस्म । मम जनन्यपि जरातुरा, मम पत्नी इदानीं नवप्रसूतिरस्ति । नवजातशिशून् विहाय साऽपि कुत्र चलितुं नसमर्था । प्रसवयन्त्रणया साऽपि पीडिता दुर्वला चाऽस्ति । अहं तयो: मातृपत्न्यो: जीवनधायक: नले नधृत: । नल: मां मारयिष्यति । मम मरणात् तयोर्दशा कीदृशीभवेत् । एतादृशं मां मारयत: तव मनसि लेशमात्रं करुणा नोदेति ? मरणावस्थायां पति तस्य कस्यचित् प्राणिन: मनोदशामत्र पद्ये श्रीहर्ष: वर्ण्णयन् स्वरचनावैविध्यं सृजति । ऊनविंशसर्गे प्रभातवर्ण्णने कवे: वर्ण्णनाविविधता द्रष्टुं शक्यते । तत्प्रसङ्गे वक्ष्यमाण: श्लोकोऽप्यत्र आलोचनीय: । स श्लोको यथा-

त्रिदशमिथुनक्रीडातल्पे विहायसि गाहते
निधुवनधृतस्रग्भागश्रीभरं ग्रहसंग्रह: ।
मृदुतरकराकारैस्तूलोत्करैरुदरं भरि:
परिहरति नाखण्डो गण्डोपधानविधां विधु: ॥[22] इति ।

पूर्णिमायां प्रात:काले आकाशे इतस्तत: स्थिता: ग्रहतारका: क्षीणप्रभा: राजन्ते, चन्द्रोऽपिगोलाकार: शोभते । कविरत्र सुन्दररूपेण वर्ण्णयति यत् आकाशं त्रिदशानां मिथुनार्थं क्रीडातल्पवत्शोभते । तत्र मिथुनक्रीडातल्पे आकाशे देवसुरतमर्दितानि कुसुमानि इतस्तत: तारारूपेण विक्षिप्तानि सन्ति । चन्द्रोऽपिसुरतक्रीडातल्पे आकाशे तूलपूर्ण्ण-उपधानसमानो दृश्यते । अत्र तात्पर्यमिदं यत् प्रात:काले आकाशे तारका: चन्द्रश्च दृश्यन्ते । स्थूलतरा: तारा: तल्पविकीर्यमाणकुसुमतुल्या: इतस्तत: दृश्यन्ते । चन्द्र: सूर्यकिरणप्रकाशस्य समीपवर्तित्वात् सङ्कुचिताभि: निजकान्तिभि: तूलापूर्ण्णगण्डोपधानवत्शोभते । दशमसर्गे दमयन्तीस्वयम्बरसभामागतानां राज्ञां परिचयं दमयन्तीनिकटे प्रदातुं सरस्वतीबालारूपेण मध्येसभमवततार । समग्रविद्यानां धात्री माता सरस्वती भवति । तस्या: वर्ण्णने सर्वा: विद्या: केनरूपेण तन्निकटे सन्तीति प्रतिपादयितुं कवि: सरस्वतीं वर्ण्णयति । वर्ण्णनप्रसङ्गे अथर्ववेद: सरस्वत्यास्त्रिवलिजातरोमरूपेणास्तीति कवि: सूचयितुं लिखति-

आसीदथर्वा त्रिवलीत्रिवेदीमूलाद् विनिर्गत्य वितायमाना।
नानाभिचारोचितमेचकश्री: श्रुतिर्यदीयोदररोमरेखा ॥[23] इति ।

नवतारुण्यमण्डिताया: सरस्वत्या: नाभिप्रदेशस्थत्रिवलिमूलात् या कृष्णवर्ण्णा रोमराजिरुद्गच्छति, सा न रोमराजि:, प्रत्युत अथर्ववेदे विद्यमाना नाना अभिचारा: प्रथिता: सन्ति । अभिचारोचितं कर्म कृष्णवर्ण्णं भवति । रोमराजिरपि कृष्णवर्ण्णा । अत: कवि: सूचयति सरस्वत्या: त्रिवलिमूलात्जाता कृष्णवर्णा रोमराजि: अथर्वश्रुतिरूपेण राजते । तत्रैव पुन: न्यायशास्त्रावस्थितित्वं सूचयितुं कवि: लिखति, यथा-

अवैमि वादिप्रतिवादिगाढ-स्वपक्षरागेण विराजमाने।
ते पूर्वपक्षोत्तरपक्षशास्त्रे रदच्छदौ भूतवती यदीयौ ॥[24] इति ।

सरस्वत्या: ओष्ठद्वयं रक्तवर्ण्णं सत्शोभते । कवि: कल्पयति यत् एतस्याः ओष्ठद्वयं वादिप्रतिवादिगाढानुरक्तं सत्पक्षपाति भवति । एतद्वयमपि पूर्वपक्षोत्तरपक्षशास्त्ररूपेण सम्मुखीनं तिष्ठति । अत: तर्कशास्त्रमेतद्वयमिति निश्चप्रचम्। काव्यस्यास्य अष्टादशसर्गे नलदमयन्त्यो: उद्दामशृङ्गाराक्रीडावर्ण्णनं कवेरुद्दामभावं सूचयति । आस्मिन् प्रसङ्गे कवि: वर्ण्णयति यत्-

सोऽयमित्थमथ भीमनन्दिनीं दारसारमधिगम्य नैषध: ।
तां तृतीयपुरुषार्थवारिधे: पारलम्भनतरीमरीरमत् ॥[25] इति ।

विविधशास्त्रानुसारेण काम: तृतीय: पुरुषार्थो भवति । स एव वारिधि: । तस्य परपारं गन्तुं भैमी एवतरि: आसीत्। तादृशीं तरिं नैषध: अरीरमत्, रमयामास इत्यर्थ: । संपूर्ण्णेऽपि सर्गे उभयो: नलदमयन्त्यो: सुरतक्रीडावर्ण्णनं कवे: वर्ण्णनवैविध्यं सूचयति । एवं द्वाविंशसर्गे सन्ध्याकालवर्ण्णनप्रसङ्गे कवे: अद्भुतकल्पनाविलासित्वं द्रष्टुं शक्यते । यथा च कविर्वर्णयति –

काल: किरात: स्फुटपद्मकस्य वधं व्यधाद् यस्य दिनद्विपस्य ।
तस्येव संन्ध्यारुचिरास्रधारा ताराश्चकुम्भस्थलमौक्तिकानि ॥[26] इति ।

अत्र काल: (संध्याकाल: मृत्युदेवो वा) किरातरूपेण चित्रित: । स्फुटपद्मकस्य दिनद्विपस्य अर्थात् विकसितपद्मस्य(कमलस्य)तस्य दिवसरूपकहस्तिन: वधंकृतवान्। हस्तिवधेन यद्रुधिरं निर्गतं तत्सर्वं संध्यारागरूपेण पश्चिमायां दिशि शोभते । अपि च हस्तिन: कुम्भस्थलात् यानि मौक्तिकानि निर्गतानि तानि सर्वाणि आकाशे तारकारूपेण भान्ति ।
अनया पर्यालोचनया ज्ञायते यत् श्रीहर्षस्य वर्ण्णनावैभवं काव्यसौन्दर्यं नितरां वर्धयति । अतः नैषधमहाकाव्ये पदलालित्यं वर्तते सर्वोपरीत्यत्र नास्ति काऽपि विप्रतिपत्तिः ।

**सन्दर्भा:**


1. ध्वन्यालोकः, प्रथमोद्यतः- का. 6, पृ. 92
2. काव्यप्रकाशः प्रथमोल्लासः, का- 3 पृ. 24
3. नैषधीयचरितम्- 1/8
4. नैषधीयचरितम्- 2/25
5. नैषधीयचरितम्- 2/26
6. नैषधीयचरितम्- 1/20
7. नैषधीयचरितम्- 1/15
8. नैषधीयचरितम्- 12/79
9. नैषधीयचरितम्- 13/34
10. नैषधीयचरितम्- 1/25
11. नैषधीयचरितम्- 2/20
12. नैषधीयचरितम्- 2/80
13. नैषधीयचरितम्- 4/59
14. नैषधीयचरितम्- 2/56
15. नैषधीयचरितम्- 4/90
16. नैषधीयचरितम्- 4/92
17. नैषधीयचरितम्- 9/16
18. नैषधीयचरितम्- 1/80
19. नैषधीयचरितम्- 1/114
20. नैषधीयचरितम्- 1 /130
21. नैषधीयचरितम्- 1/135
22. नैषधीयचरितम्- 19/9
23. नैषधीयचरितम्- 10/75
24. नैषधीयचरितम्- 10/80

25. नैषधीयचरितम्- 18/01
26. नैषधीयचरितम्- 22/09
27. संस्कृतसाहित्येतिहासः पृ. 133